श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत्परमहंसस्वामिब्रह्मानन्द विरचितम्

# ॥ श्रीहरिस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहरिस्तोत्रम् ॥

जगज्जालपालं कनत्कण्ठमालं
शरच्चन्द्रभालं महादैत्यकालम्।
नभोनीलकायं दुरावारमायं
सुपद्मासहायं भजेऽहं भजेऽहम्॥ १ ॥

सदाम्भोधिवासं गलत्पुष्पहासं
जगत्सन्निवासं शतादित्यभासम्।
गदाचक्रशस्त्रं लसत्पीतवस्त्रं
हसच्चारुवक्त्रं भजेऽहं भजेऽहम्॥ २ ॥

रमाकण्ठहारं श्रुतिव्रातसारं
जलान्तर्विहारं धराभारहारम्।
चिदानन्दरूपं मनोज्ञस्वरूपं
धृतानेकरूपं भजेऽहं भजेऽहम्॥ ३ ॥

जराजन्महीनं परानन्दपीनं
समाधानलीनं सदैवानवीनम्।
जगज्जन्महेतुं सुरानीककेतुं
त्रिलोकैकसेतुं भजेऽहं भजेऽहम्॥ ४ ॥

कृताम्नायगानं खगाधीशयानं
विमुक्तेर्निदानं हरारातिमानम्।
स्वभक्तानुकूलं जगद्वृक्षमूलं
निरस्तार्तशूलं भजेऽहं भजेऽहम्॥ ५ ॥

समस्तामरेशं द्विरेफाभकेशं
जगद्बिम्बलेशं हृदाकाशदेशम्।

www.prapatti.com

सदा दिव्यदेहं विमुक्ताखिलेहं
    सुवैकुण्ठगेहं भजेऽहं भजेऽहम्॥ ६ ॥

सुरालीबलिष्ठं त्रिलोकीवरिष्ठं
    गुरूणां गरिष्ठं स्वरूपैकनिष्ठम्।
सदा युद्धधीरं महावीरवीरं
    महाम्भोधितीरं भजेऽहं भजेऽहम्॥ ७ ॥

रमावामभागं तलानग्रनागं
    कृताधीनयागं गतारागरागम्।
मुनीन्द्रैः सुगीतं सुरैः सम्परीतं
    गुणौघैरतीतं भजेऽहं भजेऽहम्॥ ८ ॥

इदं यस्तु नित्यं समाधाय चित्तं
    पठेदष्टकं कण्ठहारं मुरारेः।
स विष्णोर्विशोकं ध्रुवं याति लोकं
    जराजन्मशोकं पुनर्विन्दते नो॥ ९ ॥

॥ इति श्रीहरिस्तोत्रं सम्पूर्णम् ॥

www.prapatti.com